नं० १०५४-घ

कैवल्योपनिषत् (उपनिषत)

दीपिकाव्याख्यासहिता

पत्राणि १२ (सम्पूर्णम)

नं० १०५४-घ

१२

सं० १०५४६

१२

कै॰उ॰ श्रीगणेशाय नमः ॥ ओं अथ कैवल्योपनिषद्दीपिका ॥ अन्तश्चो
पायांतरमाह श्रद्धेत्यादि श्रद्धा आस्तिक्यबुद्धिः भजनं भक्तिः त
देकतात्पर्यबुद्धिः ध्यानं विजातीयप्रत्ययमंतर्य सजातीयप्रत्य
यप्रवाहः ॥ एतेषां योगः संबंधः ॥ एतत्कारणमित्ति यावत् ॥ तस्मा
द्वैहि जानीहि ॥ इदानीं यथा श्रद्धा भक्ति ध्यान योगो ब्रह्मविद्यायां

अथाश्वलायनो भगवंतं परमेष्ठिनं परिसमेत्योवाच ॥ अ
धीहि भगवन्ब्रह्मविद्यां वरिष्ठां सदा सद्भिः सेव्यमानां नि
गूढां ॥ ययाचिरात्सर्वपापं व्यपोह्य परात्परं पुरुषं याति वि

कारणं ॥ तद्वत्संन्यासोपीत्याह ॥ न कर्मणा न श्रौतेन स्मार्तेन वा प्र
जया पुत्रादिना ॥ धनेन दैवेन मानुषेण वा वित्तेनेति पूर्वमनुषजते
अमृतत्वमिति वक्ष्यमाणेनानुषंगः ॥ कर्मप्रजाधनपदेष्वयंगंतव्यः १

त्यागेन निखिलश्रौतस्मार्तकर्मपरित्यागेन पारमहंस्याश्रमरूपेणै
केन महात्मानः संप्रदायविदः अमृतत्वमविद्यादिमरणभावराहि
त्यमानशुः आनशिरे प्राप्ताः साक्षाद्वक्तुमशक्यं तदर्थस्य च ब्रह्म
णो वाङ्मनसातीतत्वात् एवं कृतसंन्यासाः परेण परस्मात् कं सुखं
तस्मै स होवाच पितामहश्च श्रद्धाभक्तिध्यानयोगादवैहि न
कर्मणा न प्रजया धनेन त्यागेनैकेन अमृतत्वमानशुः परे
ण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशंति वेदांत
तद्विरोधिदुःखं अकं न यस्मिन्सः नाकः तं स्वर्गस्योपरीत्यर्थः अ
थवा परेण परं नाकमानंदात्मानं निहितं प्रक्षिप्तं धात्रा गुहायां बु
द्धौ विभ्राजते विशेषेण स्वयंप्रकाशत्वेन दीप्यते यत्स्वसिद्धं विश्व
व्यापि स्वरूपं यतयः कृतसंन्यासाः प्रयत्नवंतो ब्रह्मसाक्षात्कार

कै॰उ॰ संपन्नाविश्रांतिरिदं यथं स्मेति साक्षात्कारेणतदेवभवंतीत्यर्थः
यतीनां विशेषणमाह वेदांतः प्रसिद्धास्तेभ्यो जातं विज्ञानं
अहं ब्रह्मास्मीति ज्ञानं तस्मिन्ने यस्मान्निश्चितार्थः प्रयोजनं ये
षां ते यद्वास्मान्निश्चितो यथास्यमेवेति सम्यगवधारितो र्थो ब्रह्म
लक्षणो विषयो यैस्ते वेदांतविज्ञानस्मान्निश्चितार्थाः संन्यास
विज्ञानस्मान्निश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः।
योगात् सम्यग्ज्ञानविषयादिव्यल्लोकद्वयभोगस्य त्यागः संन्यासः
तस्य योगो ऽहं संन्यासोस्मीति बोधस्तस्मात् यतयइति व्याख्या
तं पुनरादानं विशेषत्वकथनार्थं शुद्धं रागादिकषायरहितं स
त्वमंतःकरणं येषां ते शुद्धसत्वाः एवंभूता अपि कृतश्चित्स्मृति
वंधादस्मिन् शरीरे उत्पन्नं न साक्षात्कारत्वाद्येन तदाते मुक्ता यतयो 2

ब्रह्मलोकेषु ब्रह्मणः कार्य्यस्ये क एव लोको नेकभूमिका प्रसा
द्यरूपउपर्य्यादिभागेनावस्थिनावहवएतेनाभिधीयंते तेब्र
ह्मलोकेषु परस्य कार्य्यस्य ब्रह्मणोंतकालो विनाश कालोद्भूप
र्यवसानः परांतकालस्तस्मिन् परांतकाले परात्कृष्टादमृ
तात् मरणधर्मिणोव्याकृतात् परिमुच्यंति सर्वेतोविमुक्ताभवेति
तेब्रह्मलोकेषु परांतकाले परामृताःपरिमुच्यंतिसर्वे वि
विक्तदेशेच सुखासनस्थः शुचिः समग्रीवशिरःशरीरः॥
सर्वेनिखिलाः इदानीं ब्रह्मज्ञानावाप्त्यर्थमुपासनं कर्त्तुमुपवेश
नार्थं देशविशेषादिकमाह विविक्तदेशे एकांतप्रदेशे च शब्दा
द्वाचालकादावपि सुखमनुद्वेगकरं दर्भाजिनासनं तस्मिंस्तिष्ठ
तीति सुखासनः शुचिर्बहिरंतश्च शौचयानु समानिग्रीवाच

कै॰उ॰ शिरश्च शरीरं च यस्य स ऋजुकायः पद्मकस्वस्तिकाद्यासनस्थः

3 स्त्यर्थः अत्याश्रमिको ब्रह्मचर्यादिगृहस्थवानप्रस्थकुटीचरब

हूदकेभ्य आश्रमः पारमहंसलक्षणो त्याश्रमस्थः निखिलानि स

मनस्कानि ज्ञानकर्मेंद्रियाणि निरुध्य स्वस्वव्यापारेभ्यो निरु

ध्य भक्त्या देववद्वंद्याधिकाद्वा स्वगुरुं स्वस्य तत्त्वमसीत्यर्थस्या

अत्याश्रमस्थः सकलेंद्रियाणि निरुध्य भक्त्या स्वगुरुं प्रण

म्य हृत्पुंडरीकं विरजं विशुद्धं विचिंत्य मध्ये विशदं विशोकं

च बोधकं प्रणम्य प्रकर्षेणानत्वा अनंतरं हृदयकमलपंचच्छि

द्रादिविशेषणं विरजं विरजस्कं अपगतरागद्वेषादिकं विशुद्धं

विगतसमस्तदुःखादिदोषं विचिंत्य विशेषेण ध्यात्वा हृदयपुं

डरीकस्यांतर्विषदं निर्मलं शुद्धस्फटिकसंकाशमित्यर्थः विशोकं 3

विगतदुःखमानंदपूर्णीतहृदयं स्मेराननंचेत्यर्थः वस्तुतस्तु अ
चिंत्यंवाङ्मनसातीतत्वेन प्रत्ययसंतत्यविषयंवाङ्मनसाती
तत्वे हेतुः अव्यक्तं शब्दाद्यशेषविशेषशून्यत्वादस्पष्टमव्यक्त
मसत्वंपरिच्छेदं च वारयति अनंतरूपं न विद्यते तदियत्ता रूपाणां
शरीराणां यस्य सोऽनंतरूपं देशकालवस्तुच्छेदशून्यं वा शिवंम

अचिंत्यमव्यक्तमनंतरूपं शिवं प्रशांतममृतं ब्रह्मयोनिं॥

गलरूपं प्रशांतमविद्यादोषरहितं अमृतं कालत्रयासंस्पृष्टं अ
मृतवद्व्याप्तिरतिशयानंदरूपत्वेन ब्रह्मबृहत् सर्वस्मादन्याद्धिकं
योनिं जगज्जन्मादिकारणं तथैतद्विशेषणजातं तद्ब्रह्मस्वरूप
मपि आदिमध्यांतविहीनमेकं विभुं चिदानंदमरूपमद्भुतं उत्प
त्तिपरिच्छेदविनाशवर्जितं तत्र हेतुः एकं द्वितीयवस्तुमात्ररहितं

कै.टी. विभुं समर्थं व्यापितं वा चिदानंदं स्वयं प्रकाशमानं निरतिशया
४ नंदस्वरूपं अरूपं चिदानंदव्यतिरिक्तरूपरहितं तं अद्भुतमाश्च
५ र्यकरं उमासहायं उमाब्रह्मविद्या भवानी सहायः कर्मादिप्र
दश्वरक्षकं अर्धनारीशरीरत्वेन वामांकस्थितानुपमरूपयुव
तिरूपत्वेन वा यस्य सतं परमेश्वरमुत्कृष्टं ब्रह्मादिनियंतारं प्रभुं

तमादिमध्यांतविहीनमेकं विभुं चिदानंदमरूपमद्भुतं ॥
उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकंठं प्रशांतं ध्या
स्त त्वा मुनिर्गच्छति भूतयोनिं सम साक्षिं तमसः परस्तात् ॥

समर्थं त्रीणि सोमसूर्याग्न्यात्मकानि लोचनानि यस्य तं नील
कंठं कृष्णकंठं प्रशांतं प्रसन्नवदनेंद्रियं ध्यात्वा सजातीयप्रवा
हेण साक्षात्कृत्य मुनिर्मननशीलो गच्छति प्राप्नोति भूतयोनिं भा ४

ल

कार्याद्विमलाभूतकारणं तर्हि किंकारणत्वोपाधिकमित्याशं
क्यनेत्याह समस्यसाक्षिणं सर्वबुद्धिप्रचारद्रष्टारं साक्षित्वम
पिन केवलस्येत्यत आह तमसः आवरणविक्षेपशक्तिरूपाया
अविद्यायाः परस्तात्परतः अविद्यासंबंधशून्यमित्यर्थः उमा
सहायोपासनतः प्राप्यतिरवद्येविद्यादशायां सर्वात्मेत्याह ॥
स ब्रह्मा स शिवः सेंद्रः सोक्षरः परमः स्वराट् स एव वि
ष्णुः स प्राणः स कालाग्निः स चंद्रमाः ॥ ॥
स [illegible] उक्तो ब्रह्मा प्रथमशरीरी कार्यकारणभूतः स
उक्तः शिवः उमासहायः स इंद्रः त्रिलोकीपतिः अक्षयो विनाशर
हितः परम उत्कृष्टः स्वराट् अन्यानपेक्षत्वेन स्वेनैव राजते इति
स्वराट् व्यापनशीलो विष्णुः शंखचक्रगदाधरः प्राणादिपंच
वृत्तिरूपः कालरूपी वैश्वानरः कालाग्निः चंद्रः शशांकः ॥ ॥

कै·टी· सएवोक्तएवंसर्वंनिखिलंयस्मात्संभूतमतीतंयदपिभाव्यंभा
5 विचकाराद्वर्त्तमानमपिसनातनंचिरंतनंज्ञात्वाहंब्रह्मास्मीति
साक्षात्कृत्यतमुक्तमात्मानंमृत्युंअविद्यासंस्कारांअत्येतिअ
तीत्यगच्छतिनान्यउक्ताद्ब्रह्मज्ञानाद्यतिरिक्तोमार्गोविमुक्तयेमु
सएवंसर्वंयद्भूतंयच्चभव्यंसनातनं ज्ञात्वातंमृत्युमत्ये
तिनान्यःपंथाविमुक्तये॥सर्वभूतस्थमात्मानंसर्वभूता
त्मार्थंनास्तीतिशेषः एतस्त्रयाणांविश्वतैजसप्राज्ञानांविराट्।
हिरण्यगर्भेश्वराणांवास्वयंप्रकाशत्वेनकोचनंनीलंतमोऽज्ञा
नंकंठेकंठवच्चिदेकदेशव्याप्तित्वेनचैतन्यस्यवर्त्तनेयस्यसनील
कंठस्तमितिव्याख्यानंतथाविषादमविद्यारहितंविशोकंदुःख
संसाररहितंउमासहायंप्रशान्तंपुनरुत्थानसंस्कारवर्जितमि ५

तिनिर्गुणपरत्वेन समस्तवाक्यमवगंतव्यं निर्गुणस्याप्युप
लब्धत्वेन हृदयप्रदेशमध्यस्थत्वमविरुद्धं तथा च ध्यानात्मामनन
निदिध्यासनेषूक्तेष्वेतदप्युपपन्नमेव निखिलेषु स्थावरजंग
मेषु तिष्ठतीति सर्वभूतस्थस्तमात्मानं अस्मत्प्रत्ययव्यवहार
योग्यं सर्वभूतानि निखिलानि स्थावरजंगमानि चकार आधा

निचात्मनि संपश्यन्ब्रह्मपरमं याति नान्येन हेतुना॥

राधेयभावव्यक्तमार्थः आत्मन्यानंदात्मनि अहंप्रत्यययोगे
संपश्यन्सम्यक्संशयविपर्ययमंतरेणावलोकयन् ब्रह्म
देशकालवस्तुपरिच्छेदशून्यं परममुत्कृष्टं अनुपचरित
मित्यर्थः याति प्राप्नोति न यातीति देहलीप्रदीपन्यायेन संबध्य
ते न याति न प्राप्नोति अन्येनोक्तबोधव्यतिरिक्तेन हेतुना कार
णेनोत्पद्यते तदात्मज्ञानोत्पादनोपायमाह॥

के॰टी॰ आत्मानमंतःकरणमरणिंवन्हिजनकंमंत्रसंस्कृतंकाष्टंकृत्वाधो
विधायाधरणित्वेनाचिंतयित्वेत्यर्थः प्रणवमोंकारमुत्तरारणि
6 मपिचकारःकृत्वेत्येतदनुवृत्यर्थः ज्ञानस्यसर्वात्मकोहमितिरू
पस्यमथनंयुक्तिभिर्विलोडनंतस्याभ्यासआवृत्तिरूपोज्ञानानि
र्मथनाभ्यासस्तस्मात् उत्पन्नेनाहंब्रह्मास्मीतिसाक्षात्काराग्नि

आत्मानमरणिंकृत्वाप्रणवंचोत्तरारणिं ज्ञाननिर्मथना
भ्यासात्पाशंदहतिपंडितः सएवमायापरिमोहितात्मा ।

नापाशमात्मनोबंधनरूपमज्ञानरज्जुरचितमहमादिग्रंथिंदहति
भस्मीकरोति पंडाअहंब्रह्मास्मीबुद्धिःतामितःप्राप्तःपंडितःनन्व
स्यासंगोदासीनस्याद्वितीयस्यकुतःसंसारयात्रारूपइत्यतआ ६
ह सएवोक्तोदासीनासंगएवनत्वन्य मायाविद्यावरणविज्ञेय

करीशक्तिस्तयापरिमोहितः स्वयंप्रकाशआनंदात्मास्वस्वरूपो
पः स्थूलादिभेदभिन्नंमनुष्यादिकलेवरमास्थायाहंमनुष्यइ
त्याद्यभिमानमसमंतात्स्वीकृत्यकरोति सर्वंनिखिलंव्यापारजा
तंकुरुते स्त्रियोमनोनुकूलायुवत्योन्नपानेमनोनुकूलेआदि
शब्देनवसनाच्छादनादीनमनोनुकूलानिस्त्र्यन्नपानादिभिर्वि
शरीरमास्थायकरोतिसर्वं स्त्रीयोन्नपानादिविचित्र
भोगैःसएवजाग्रत्परितृप्तिमेति॥ ॥
चित्रैर्भोगैस्त्रियेत्तिछांदस सएव सएवमायापरिमोहितएवनत्व
न्यः जाग्रज्जागरणमिंद्रियैर्वास्वविषयोपलब्धिरूपंकुर्वन्परि
तृप्तिंसर्वतोविषयसुखज्ञानतृप्तिस्तामेतिगच्छतिसुखंदुःखंच
प्राप्नोतीत्यर्थः इदानींस्वप्नसुषुप्त्योर्विशेषपतदभावकथनेनसं

के॰टी॰ स्वप्ने इंद्रियग्रामोपरमरूपायां स्वप्नावस्थायां जीवः प्राणानां धार
यिना विविधविषयावासनावासितः सुखदुःखयोः प्रसिद्धं योभो
क्ता सुख्यहं दुःख्यहमित्येवं रूपं प्रत्ययवान् तत्र संसारस्य दृष्टांते
न यात्संचारयति स्वमायया स्वस्य तत्तद्देहाभिमानो माया अ
ज्ञानं विपरीतज्ञानं तया कल्पिते वासनारूपे विश्वस्मिन्नथरस्य
स्वप्ने स जीवः सुखदुःखभोक्ता स्वमायया कल्पितविश्वलो
के सुषुप्तकाले सकले विलीने तमोभिभूतः सुखरूपमेति ॥
योगपंथादिके निखिलेभुवने लोके च कल्पितविश्वलोके स्वप्ने य
थातद्वज्जागरेपीत्यर्थः सुषुप्तिकाले आनंदभोगावसरे निखिले वि
लीने विशेषविज्ञाने स्वकारणलयं गते एतावत्सुषुप्ते मोक्षेवसम
न्वयां स्तु विशेषः तमोभिभूतो ज्ञानावृतः सुखरूपं स्वयं प्रकाश ७

मानंआनंदस्वरूपंप्राप्तएवसुषुप्तिंगतोनान्योजीवःप्राणाभिधा
रकःस्वपितिस्वप्नावस्थांगच्छतिसुषुप्तादथयाप्रबुद्धःप्रबोधजाग
रणंप्राप्तोभवतीतिशेषः इदानींजीवब्रह्मणोरैक्यमाह पुरत्रयेस्थू
लसूक्ष्माज्ञानाख्येशरीरत्रयेक्रीडतिविहरतियश्चजीवःचकार
एवकारार्थः प्रसिद्धपरमात्मेवप्राणधारकः तत्वस्तुतस्मादेवजी

पुनर्भवजन्मांतरकर्मयोगात्सएवजीवःस्वपितिप्रबुद्धः पुर
त्रयेक्रीडतियश्चजीवस्ततस्तुजातंसकलंविचित्रं॥आधारमा

वाभिन्नोनत्वन्यस्तस्माज्जातमुत्पन्नंसकलंनिखिलंविचित्रंवि
विधकर्मनामरूपंविश्वस्वेमाधारंरज्जौरिवसर्पधारावलीवदमृ
त्तिकत्वादेःसकलस्यविश्वस्याधारभूतंआनंदंनिरतिशयानंद
स्वरूपंअखंडबोधंआनंदस्वरूपत्वेपिस्वयंप्रकाशैकस्वभावंय
स्मिन्नखंडबोधयंविनाशंयातिगच्छतिपुरत्रयंचयस्मात्तेदृष्टदीन्यपि

कै०टी० एतस्मात्तु [illegible]याधिष्ठानाद्धृदेशेषु जायते उत्पद्यंते प्राणः क्रियाश
४ क्तिः मनोंतःकरणं ज्ञानशक्तिः सर्वेंद्रियाणि च सर्वज्ञानकर्मेंद्रि
याण्यपि च शब्दादीन्हादिकमपि खं च नभो वायुर्नभस्वान् ज्योतिस्ते
जो धातुरापो नीराणि पृथिवी भूमिः विश्वस्य निखिलस्य स्थाव
रजंगमात्मकस्य प्राणिजातस्य धारिणी इदानीं महावाक्यार्थमा
एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च खं वायुर्ज्योतिरा
पश्च पृथ्वी विश्वस्य धारिणी यत्परं ब्रह्म सर्वात्मा विश्वस्या[illegible]
ह यस्यासिद्धं परमुत्कृष्टं ब्रह्म च यत् देशकालवस्तुपरिच्छेदशून्यं सर्वा
त्मा सर्वप्राणिहृदि स्थितः सर्वो नस्यश्चा विश्वस्य सर्वस्य कार्य
कारणजातस्यायतनमाधारभूतं महत्स्थौल्यं सर्वाधारत्वेनैव स ८
क्ष्मात्सूक्ष्मपरिमाणात्सूक्ष्मतरं महतोप्यतिशयेनानुनित्यं विनाश

भून्यंतदुक्तंपरंब्रह्मत्वमेवतत्त्वगंतैथनत्वन्यन्ननुतन्मनोन्य
दहंनुतस्मादन्यः मयिकर्तृत्वादिधियिश्रोबोपलंभादित्यतआह
त्वमेवतत्त्वंचनोभोक्तादिधियावस्तुतः परंब्रह्मैवनत्वन्यः इ
दानीमेवज्ञानेफलमाह जाग्रत्स्वप्नसुषुप्त्यउक्ताः तद्भोक्तारो
विश्वविराडादयस्तएवप्रपंचोजाग्रदादिप्रपंचः तंयस्मासिस्य
सूक्ष्मात्सूक्ष्मतरंनित्यंतत्वमेवत्वमेवतत् जाग्रत्स्वप्नसु पृ॰ दि
षुप्त्यादिप्रपंचंयत्प्रकाशते तद्ब्रह्माहमितिज्ञात्वासर्वबंधैः पृ॰ ३
स्वयंप्रकाशज्ञानेइति तदुक्तं स्वयंप्रकाशं ब्रह्मसत्यज्ञानादिलक्ष
णं अहंब्रह्मावगंताचिदानंदास्मीति अनेनप्रकारेणज्ञात्वासा
क्षात्कृत्यसर्वबंधैर्निखिलबंधैरहममाद्यैर्ध्यासकारणैः प्र
मुच्यते प्रकर्षेणमुक्तोभवति इदानींसर्वस्मात्सप्रपंचाद्विल
क्षणत्वमाह त्रिषुजाग्रत्स्वप्नसुषुप्तेषुधामसुस्थानेषुय

कै॰टी॰ स्वप्नसिद्धं भोग्यं स्थूलं च वि शालं प्रविविक्तानंदरूपं भोक्तारं वि
१ श्वतैजसप्राज्ञाख्या भोगश्च स्थूलरूप प्रविविक्तानंद भोगोपि च
शब्दादधिदैवाधिभागोपि यदुक्तं त्रिधाम भोगादि प्रपंचजातं
भवेत् स्पष्टं तेभ्यस्त्रिधामादिभ्यो विलक्षणो विपरीतलक्षणः
वैलक्षण्यमाह साक्षी स्वाध्यक्षस्य विश्वस्य द्रष्टा चिन्मात्र
त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् तेभ्यो विल
क्षणः साक्षी चिन्मात्रोहं सदाशिवः मय्येव सकलं जातं
चिदेकरसः अहंप्रत्ययगम्यो व्यवहारयोग्यः सदाशिवः शिवः कल्या
णो नित्यकल्याणरूपो महेश्वरः प्रपंचवैलक्षण्यं स्वस्यात्कं
इदानीं जगज्जन्मादिकारणत्वमपि स्वस्याह मय्येव मत्त ए
व ब्रह्माभिन्नात्मस्वरूपात्सकलं निखिलं भूतभौतिकप्र ९
पंचजातं जातमुत्पन्नं मयि ब्रह्माभिन्ने निखिलं विश्वं प्रति

ष्ठितं प्रकर्षेण स्थितिं प्राप्तं मयि सर्वं व्याप्तं लयं याति विनाशं ग
च्छति तत्तस्मात्सर्वजगज्जन्मस्थितिध्वंसकारणात् ब्रह्मवद्देश
कालवस्तुपरिच्छेदशून्यं अद्वयं ज्ञातृज्ञेयादिविभागशून्यं अस्मि
भवामि अहं ब्रह्मणो जगतां जन्मस्थितिध्वंसकारणं जगदाका
रत्वेन विकारिं प्राप्तं तदेतदिति द्वैविधस्वरूपत्वेन वारयति ॥ श्री

मयि सर्वं प्रतिष्ठितं मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्य
हं अणोरणीयानहमेव तद्वन्महानहं विश्वमिदं विचित्रं ॥

अणोरणुपरिमाणत्वादणीयान् अतिशयेनाणुरहमेव जगत्का
रणमहं प्रत्ययमयत्वारस्य योगेन तन्त्यस्तद्वत् यथाणुस्तथाम
हान् सर्वस्मादप्यधिकं अहं व्याप्तं अणीयसां महतां आकारा
णां च यथाभेदस्तत्रापि स्यादित्यत आह विश्वमिदं विश्वं भुव
नं भौतिकप्रपंचजातं अहं व्याप्तं अस्य तत्त्वाभेदराहित्यस्व

के·टी· पश्चादप्यनेकत्वाद्यादित्याह विचित्रं विविधं स्वयमनंतभे
10 दनदित्यर्थः तदभिन्नस्य तथा प्याधुनिकत्वं स्यादित्यत आ
ह पुरातनः चिरंतनः आधुनिक सर्वेश्वरावली वर्ह्य मूर्ति
तत्वाद्यभिन्नाचिरंतनी रज्जुरिव अहं व्याख्यातं पुरुषः प
रिपूर्णो वस्त्वतोऽहं व्याख्यातं अविद्यादत्वकार्याईश्चानियंता
पुरातनोऽहं पुरुषोऽहमीशो हिरण्मयोऽहं शिवरूपमस्मि ॥
अपाणिपादोऽहमचिंत्यशक्तिः पश्याम्यचक्षुः स शृणोम्यक
नियंतृत्वं सामर्थ्य महं हिरण्मयो ज्ञानप्रचुरस्तत्प्रधानो वा
दित्यस्थः सर्वकार्यकारणात्माहं माख्यातं शिवरूपं मंगल
स्वरूपं ब्रह्मास्मि भवामि इदानीं सर्वकरणहीनस्य सर्वज्ञतां
तस्याह अपाणिपादः पाणिपादहीनः अहं व्याख्यातं अचिं १०
त्यशक्तिः दुर्बोध्यशक्तिरेवं मत्तोपि जवनो गृहीतेत्यर्थः ॥ ॥

चक्षुर्हीनोप्यवलोकयामि सअचक्षुर्द्रष्टाकर्णैरहितः श्रवणं।
करोमि विजानामि विविधं प्रपंचजातं मवगच्छामि विविक्तरू
पो बुद्ध्यादि पृथग्रूपः न चास्ति नास्त्येव वेत्ता कर्मकर्तृभावे
नावगंतामम मानंदात्मनोभेदरहितस्य चित्स्वयंप्रकाशबोध
स्वभावः सदा सर्वदा इदानीं सर्वशास्त्रप्रतिपाद्यस्यात्मनः स
अहं विजानामि विविक्तरूपो न चास्ति वेत्ताममचित्सदाहं
वेदैरनेकैरहमेववेद्यो वेदांतकृद्वेदविदेव चाहं नपुण्यपा
वे विकाराभावं दर्शयति वेदैर्ऋगादिभिरनेकैर्बहुभिरहमेववे
द्यो वेदांतकृत् वेदांतसूत्रकृद्व्यासरूपः वेदविदेव वेदांतकर्ता।
विशेषणं वेदानां सांगानां सांख्यादिविद्यास्थानानां वेत्ता वेद
वित्स एवनान्यः चशब्दादनेकतपः संपन्नश्चाहं व्यासमात्मानं
नेन विभातिमत्सदेव विदमेव प्रधानमित्युक्तं नपुण्यपापे मम

कै॰टी॰ स्यषं नस्तस्यस्तिशेषः नास्ति नाशोपि नाशो न विद्यते मम मेत्यनु
॥ षंगः नभूमिरापो मम पृथिवी सोहं कामम नास्तीत्यनुषंगः
वह्नि नै विद्यते मम न चानिलो मेस्ति वायुरपि मम न विद्यते च
कारा द्वाप्यमवीयमपि न चांबरं अंबरमाकाशः कार आकाशका
र्येतद्यतिरिक्तार्थानुरूभावार्थः एवंमुक्तेन प्रकारेण विदि
पे मम नास्ति नाशो न जन्म देहेंद्रियबुद्धिरस्ति नभूमि
रापो मम वह्निरस्ति न चानिलो मेस्ति न चांबरं च॥
त्वात्साक्षात्कृत्य परमात्मन उत्कृष्टानंदात्मरूपं गुहाशयं वुद्धौ
शयानं निष्कलं निर्गता प्राणबुद्धीस्त्रे वायुर्ज्योतिरापः पृथि
वींद्रियमनोन्नमन्नाद्वीर्यं तपोमंत्रकर्मलोकनामाख्याः कला
यस्य तन्निष्कलं अद्वितीयं सजातीयविजातीयद्वितीयवस्तु
शून्यं भावभावविवर्जितं तदेव निरवयवं गच्छतीत्याह के॰स्यषं ११

एवंभूतपरमात्मानंप्रतियत्तुमशक्यस्याशुद्धांतःकरणस्यांतः
करणशुद्ध्यर्थमाह यः प्रसिद्धोमुमुक्षुरनुत्पन्नसाक्षात्कारःशत
रुद्रियंनमस्तेरुद्रमन्यवइत्यध्यायमधीतेपठति यथाशक्ति नि
त्यंसशतरुद्रियाध्यायकोअग्निभिःश्रोतस्मार्तैःपवित्रीकृतोऽ
एवंविदित्वापरमात्मरूपंगुहाशयंनिष्कलमद्वितीयं समस्
तसाक्षिंसदसद्विहीनंप्रयातिशुद्धंपरमात्मरूपं यःशतरु
द्रियमधीतेसोग्निपूतोभवति सुरापानात्पूतोभवति ब्रह्म
हत्यायाःपूतोभवति सुवर्णस्तेयात्पूतोभवति कृत्याकृत्या
ग्निपूतोभवतीत्यस्पष्टं मदिरापानान्महापातकदोषान्मुक्तोब्रह्मह
त्याद्ब्रह्महत्यायास्तद्रूपमहापातकदोषात् कृत्यंकरणीयंबुद्धिपू
र्वकंपापंअकृत्यंअबुद्धिपूर्वकंपापंकृत्यंचाकृत्यंचतस्मात्कृत्या
कृत्यात्पूतोभवति तस्माच्छतरुद्रियाध्यायनादविमुक्तंविमुक्तं
श्रमीसर्वदानिरंतरंसकृत्कदाचिद्वादिवसेदिवसेएकवारमित्यर्थः॥

कै॰टी॰ वाश्राद्दोधिकारसामर्थ्यानुसारेण अवस्थितविकल्पार्थे अनेन
रुद्राध्यायजपेन ज्ञानं अहं ब्रह्मास्मीति साक्षात्काररूपमाप्नोति।
संसारार्णवनाशनं संसारसागरशोषणं यस्माद्रुद्राध्यायजपो
शेषपापनिर्वहणद्वारा ब्रह्मज्ञानहेतुस्तस्मात्तत एवंविद्वान्॥

तस्मादविमुक्तमाश्रितो भवत्याश्रमी सर्वदा सकृद्वा जपेद
नेन ज्ञानमाप्नोति संसारार्णवनाशनं तस्मादेवं विदित्वेनं
कैवल्यं फलमश्नुते कैवल्यं फलमश्नुत इति इति कै॰उ॰स॰त्त

उक्तेन प्रकारेण त्रिनेत्रध्यानेन रुद्राध्यायाध्ययनादिना विदित्वा
साक्षात्कृत्य एनं परमात्मानं कैवल्यं केवल्यस्यात्मनो भावः कैव
ल्यं तत्फलं पुरुषाभिलाषविषयं सर्वपुरुषार्थसमाप्तिम् तमश्नु
ते प्राप्नोति कैवल्यं फलमश्नुत इत्याम्रेडितं पदाभ्यासः उपनिषत्स 12
माप्त्यर्थः इति श्रीमत्परमहंसपरिव्राजकाचार्य्यभगवद्विरचिता
कैवल्योपनिषद्दीपिकाविवरणं संपूर्णं शुभं भवतु